International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(3): 160-162
© 2019 IJSR
www.anantaajournal.com
Received: 15-03-2019
Accepted: 26-04-2019

**डॉ. एम. किषन्**
सहायकाचार्यः, संस्कृतविभागः, दिल्लीविश्वविद्यालयः, दिल्ली, भारत

**डॉ. उमाशंकरः**
सहायकाचार्यः, संस्कृतविभागः, दिल्लीविश्वविद्यालयः, दिल्ली, भारत

**Correspondence**
**डॉ. एम. किषन्**
सहायकाचार्यः, संस्कृतविभागः, दिल्लीविश्वविद्यालयः, दिल्ली, भारत

# उत्तमकाव्यरचना

## डॉ. एम. किषन्, डॉ. उमाशंकरः

**मुख्यविषयः-**
काव्यशास्त्रे उत्तमकाव्यद्वारा, सुशब्दद्वारा उत्तमगतिर्भवति, तेन स्वर्गलोकं प्राप्स्यते । तदर्थमुत्तमकाव्यरचनाः करणीया। अपशब्दः अपकीर्तेः कारणं भवति । काव्यलक्षणकारैः सूरिभिः एतदुच्यते यत् काव्यमुत्तममध्यमाधमभेदेन वर्तते इति। उत्तमकाव्यद्वारा रसानन्दं भवति, रसानन्दं साक्षात् भगवत्स्वरूपमस्ति । काव्यप्रयोजनरूपेण विद्वद्भिः धर्मार्थकाममोक्षसिद्धिरेव प्रतिपादिताः । उत्तमकाव्यरचनाद्वारा पुरुषार्थचतुष्टयस्य प्राप्तिरेव द्योतते ।

**कूटशब्दः** सुशब्दः, मोक्षः, धर्मः, रसः

**उत्तमकाव्यपरिचयः**
भरतोक्तनाट्यशास्त्रे रससिद्धान्तमाश्रित्य' विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तेर्द्वारा'[1] एवं रसानन्दं परमानन्दस्वरूपश्च प्राप्यतेति प्रतिपादितम्। रसमित्युक्ते रस्यतेति रसः, रस्यते आस्वाद्यतेति रसः इत्यादि अलौकिकानंदानुभूतेः आस्वादनं द्योततेति विश्वनाथाचार्यैरुक्तः।
श्लोकं वा पद्यं वा उत्तमोत्तममहाकाव्यरचनाः कथं करणीयमिति, चर्चायां काव्यलक्षणानुसारेणैव इति आलङ्कारिकैः स्पष्टमुक्तम्।

शक्तिर्निपुणतालोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाऽभ्यास इतिहेतुस्तदुद्भवे॥ [2]

इतिकाव्यप्रकाशे उत्तमलक्षणमाह काव्यकुशलत्वं शब्दशक्तिर्वर्णनानिपुणत्वं, सामाजिकव्यवहारादिकं यत्सर्वं स्पष्टं दरीदृश्यते। मम्मटाचार्योक्तदिशा काव्यप्रकाशलक्षणग्रन्थे उत्तम-मध्यम-अधमकाव्यभेदत्रये उत्तमकाव्यलक्षणमाह। यथा- "तददोषौशब्दार्थौसगुणावनलंकृतीपुनःक्वापि" इत्युक्तलक्षणमाश्रित्यैव रचनीयमिति।

[1] नाट्यशास्त्र.६.३१
[2] काव्यप्रकाश ०१.३

उत्तमकाव्यं नाम दोषरहितौ शब्दार्थौ शौर्यादि सगुणसम्पन्नौ अलङ्कारनिमित्तेन उत्तमकाव्यमिति मम्मटाचार्योक्तिः। उत्तमकाव्यलक्षणमूचुः-

"इदमुत्तमतिशयिनिव्यङ्ग्येवाच्याद्ध्वनिर्बुधैःकथितः"[3]

इदंकाव्यंबुधैः वैयाकरणपण्डितैः शब्दगतवाच्यार्थादपि व्यङ्ग्यार्थः एव अधिकसौन्दर्यचमत्कारजनकत्वं भवतीति तेषाम् अभिप्रायः। काव्यप्रकाशे उत्तमकाव्यभेदोदाहरणमाह-

निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरगोऽधरो
नेत्रे दूरमनंजने पुलाकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति बांधवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गताऽसि न पुनस्तस्याधमस्यान्तिके ।। [3]

तथैव आनन्दवर्धनाचार्यादि ध्वनिकारैरपि काव्यस्यात्माध्वनिरिति काव्यलक्षणम् अंगीकृतः।

कव्यस्यत्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वै-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
केचिद्वाचां स्थितमविशये तत्त्वमूचुस्तदीयं
तेना ब्रूमः सह्रुदयमनः प्रीतये तत्स्वरूपम् ।। [4]

तत्र ध्वनिकारः ध्वनिः कथं ध्वन्यतेति, तस्य वाच्यप्रतीयमानभेदानुक्त्वा, व्यंग्यार्थस्वरुपभूमिकां रचयितुमिदमुच्यते। एवं वाच्यव्यतिरेकिणो व्यंग्यस्यार्थस्य सद्भावं व्यंग्यं प्रतिपादितः ध्वनिकारेण । सूरिभिः विद्वद्भिः मतानुसारेण यात्रार्थो वाच्यविशेषः वाचकविशेषः शब्दो वा तमर्थं व्यंक्तः, स कव्यविशेषो ध्वनिर्ध्वन्यतेति ज्ञायते ।

यात्रार्थः शब्दो वा तमार्थमुपसर्जनीकृतस्वार्थौ।
व्यंक्तः काव्यविशेषः स ध्वनिरिरिति सूरिभिः कथितः ।।
योऽर्थः सह्रुदयश्लाग्यः काव्यात्मेति व्यवस्थितः।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ।। [5] इति

काव्यस्य वाच्यात्मकत्वं ललितोचितसन्निवेशचरुणः शरीरस्येवात्मा साररुपतया स्थितः सहृदयश्लाघ्यो योऽर्थस्तस्य वाच्यः प्रतीयमानश्चेति द्वौ भेदाविति। वस्तुरुपध्वनिर्यथा-

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यात्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवान्गनासु।। [6]

तत्र ध्वनिनिरूपनसंदर्भे वस्तु-रस-अलंकारभेदेन त्रिविधध्वनयः अंगीकृतः आनंदवर्धनः। वाल्मीकिमुखारविन्दात् बहिर्गतः क्रौंचाक्रंदजनितःशोकैव श्लोकः ‘शोकः श्लोकत्वमागतः’ इति अत्र वाल्मीकिह्रुदयादागतः।
अत्र शोकस्य प्रतीयते रसध्वनेःउदाहरणेन प्रदर्शितमिति आनंदवर्धनेन ध्वन्यालोके।

कव्यस्यात्मा स एवार्थास्तथा चादिकवेः पुरा।
क्रौंचद्वंद्ववियोगोत्थः शोकः श्लोकत्वमागतः।। [7]

ऐतिहासिकरामायणे क्रौंचद्वन्दवियोगवर्णनं करुणरसोपेतमाविष्कृतः वाल्मीकिना । उदाहरणम् –

मा निषाद प्रतिष्टां त्वमगमः शाश्वतीस्समाः।
यत्क्रौंचमिथुनादेकमवधीः काममोहितम्।। [8]

एवंप्रकारेण आचार्यविश्वनाथकविराजः साहित्यदर्पणे वाक्यं रसात्मकं काव्यमिति काव्यलक्षणमुक्त्वा द्वे काव्यभेदमाह-
काव्यं ध्वनिर्गुणीभूतव्यंग्यं चेति द्विधा मतम् ।[9]
तथैव तत्रकाव्यस्य आत्मा-शरीरयोः महात्म्यमपि उक्तवान् उक्तं हि- “काव्यस्य शब्दार्थौशरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, अलंकाराः कटककुंडलादिवत्” इति।[10]
आचार्यजगन्नाथपण्डितादयोऽपि रसगङ्गाधरकाव्यलक्षणग्रन्थे काव्यलक्षणमेवं प्रतिपादितः-
"रमणीयार्थप्रतिपादकः शब्दःकाव्यम्" इति, किंरमणीयमितिप्रश्ने?

[3] का.प्र.१.४
[4] ध्वन्यालोकम्. १.१
[5] ध्व.लो.१.२
[6] ध्व.लो.१.४
[7] ध्व.लो.१.५
[8] रामाययणम्. बालकाण्डम्. २. १५.पृष्ठसंख्या २६
[9] साहित्यदर्पणम्. ४.उ
[10] सा.द.प्र.परिच्छेद्

"रमणीयताचलोकोत्तराह्लादज्ञानगोचरत्वम्"

इतिलोकोत्तरत्वंनामचाह्लादगतश्चमत्कारत्वमिति"

स्पष्टमुक्तवान्। काव्यलक्षणनिष्कर्षे एवंप्रकारेण "इत्थंचमत्कारजनकभावनाविषयार्थप्रतिपादकः-शब्दत्वम्" शब्दशक्तिकारणादेव उत्तमोत्तमकाव्यमिति बोधितवान्।[11] तत्र काव्यं तच्चोत्तमोत्तमो-त्तम-मध्यमा-धमभेदान् चतुर्विधमिति पण्डितराजजगन्नाथः अभ्युपगच्छति। निरुपयति च सम्यक् रसगंगाधरेतत्र शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थमभिव्यंक्तः।[12] तत् उत्तमोत्तममिति आद्यस्य लक्षणम्। उदाहारणं च शयिता इत्यादि पद्यं प्रस्तूयत।

शयिता सविधेऽप्यनीश्वारा सफलीकर्तुमहो मनोरथान् ।

दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते ।।

अथ चित्रमीमांसायां अप्पय्यदीक्षितैः ध्वन्युदाहरणप्रसंगे कृता 'निश्शेषच्युतचन्दनमित्यादि' पदस्य व्याख्या समीचीना न भवतीति पंडितराजःनिरुपयति। प्रथमं दीक्षितमहोदयानां व्याख्या प्रस्तूयते। अस्मिन् निश्शेषच्युतश्लोके नायकमानेतुं प्रहितां तमुपभुज्य आयातां दूतीमुद्दिश्य उत्तमनायिकाया आशयः अनेन पद्येन प्रतिपाद्यते ।

पद्यघटकैःनिश्शेषेत्यादि पदैः स्नानकार्यप्रकाशनद्वारा दूतीकृत संभोगः व्यंग्यत्वेन प्रकाश्यत इति दीक्षितस्य आशयः इति द्योतते।

काव्यादोषान् उक्त्वा काव्यरचनाकारणीयेति काव्यदोषविशेषलक्षणे मम्मटाचार्यः षोडशदोषाणाह-

दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थम्।

निहितार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाऽश्लीलम् ।।

संदिग्धम्प्रतीतं ग्राम्यं नेयार्थमथ भवेत् क्लिष्टम् ।

अविमृष्टविधेयांशं विरुद्धमतिकृत्समासगतमेव ।।[13]

दण्डिमहाकविविरचितमिदं काव्यादर्शलक्षणग्रन्थे अल्पादपि एकैकमपि दोषसहितशब्दप्रयोगकारणात् काव्यसौन्दर्यस्य हानिर्भवतीति दोषसहितकवित्वं कुकवित्वमिति (कुत्सिताकविता) आलङ्कारिकाणांसिद्धान्तः। अत्र सुन्दरयुवत्याः मुखारविन्दे एकेनश्वित्रेण (Vitiligo) सौन्दर्यविहीनकान्तिर्भवतीति उदाह्रियते।

तदल्पमपिनोपेक्ष्यंकाव्येदुष्टंकथञ्चन।

स्याद्वपुःसुन्दरमपिश्वित्रेणैकेनदुभरम्॥ [14]

यथा कश्चनव्यक्तिः कवित्वं न लिखतिचेत्, कदापि अधर्मः न भवति। रोगग्रस्तः अपि न, महाराजदण्डनमपि न प्राप्यते इति। परन्तु कुकवित्वेन साक्षात्मरणमेवभवति। कुकवित्व – रचनात् अपयशो मृत्युरेवेति च, कविर्नभवति चेत् किमपिदोषःनासीदितिशास्त्रम्।

नाकवित्वमधर्माय व्याधये दंडनाय वा।

कुकवित्वं साक्षात् मृतिर्माहुर्मनीषिणः।। [15] इति.

दंडिनः काव्यादर्शालंकारग्रंथेस्तिरबुद्धिपरः रचनाकारः प्रयुक्त शब्दशौष्टवेन तमोरूप अज्ञानान्धकारं निर्मूल्य आसंसारं शब्दज्योतिरूपेण प्रकाशतेत्युच्यते ।

इह शिष्टानुशिष्टानांशिष्टानामपि सर्वथा ।

वाचामेव प्रसादेन लोकयात्रा प्रवर्त्तते।।

इदमंधं तमः कृत्स्नं जायेत भुवनत्रयम् ।

यदि शब्दाह्वयंज्योतिरासंसारं न दीप्यते ।। [16]

"एकः शब्दः सुप्रयुक्तः स्वर्गेलोकेच कामधुग्भवतीति" महाभाष्यकारेण सत्काव्यरचनात् स्वर्गप्राप्तिर्भवतीति चतुर्वर्गफलप्राप्तिमनुसृत्य ऐहिकामुष्मिकफलसिद्धिः प्राप्नुवन्तीतिबोधितः।

**संदर्भग्रन्थाः –**


1. नाट्यशास्त्रम् – विद्यानिधि प्रकाशन, दिल्ली
2. काव्यप्रकाशः – चौखम्बा विद्याभवन, वाराणसी
3. ध्वन्यालोकः – (तेलुगु) श्रीजयलक्ष्मी पब्लिकेशन्स, हैदराबाद
4. रामायणम् – वाविल्ल रामास्वामिशाश्त्रुलु एंड संस, चेन्नपुरी
5. साहित्यदर्पणम् – चौखम्बा विद्याभवन, वाराणासी
6. काव्यालंकारः – Motilal Bhanarasidas Publishers, Delhi.
7. काव्यादर्शः– चौखम्बा विद्याभवन, वाराणसी
8. रसगंगाधरः- चौखम्बा विद्याभवन, वाराणसी


[11] रसगंगाधरम्. प्र,आननम्

[12] र.गं.१.२

[13] का.प्र.७.५०-५१

[14] काव्यादर्श.१.७

[15] काव्यालंकार. १.१२

[16] का.द.१.३-४